## तस्य वापः । (४५/१७११)

तस्य इति षष्ठीसमर्थाद् वापः [1]इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । उप्यतेऽस्मिन्[2] वापः क्षेत्रमुच्यते । प्रस्थस्य वापः क्षेत्रं प्रास्थिकम् । द्रौणिकम् । खारीकम् ॥

## पात्रात् ष्ठन् । (४६/१७१२)

पात्रशब्दात् ष्ठन् प्रत्ययो भवति 'तस्य वापः' (५.१.४५/१७११) इत्येतस्मिन् [3]विषये । ठञोऽपवादः । नकारः स्वरार्थः । षकारो ङीषर्थः । पात्रशब्दः परिमाणवाची । पात्रस्य वापः पात्रिकं क्षेत्रम् । पात्रिकी [4]क्षेत्रभक्तिः ॥

## तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते । (४७/१७१३)

तद् इति [5]प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति, यत् तत् [6]प्रथमासमर्थं [7]वृद्ध्यादि चेत् तद् दीयते । दीयते इत्येकवचनान्तं वृद्ध्यादिभिः प्रत्येकमभिसम्बध्यते । तत्र यदधमर्णेन उत्तमर्णाय [8]मूलधनातिरिक्तं देयं तद् वृद्धिः । ग्रामादिषु [9]स्वामिग्राह्यो भागः आयः । पटादीनामुपादानमूलादतिरिक्तं द्रव्यं लाभः । [10]रक्षानिर्वेशो राजभागः शुल्कः । उत्कोच[11]उपदा । पञ्च अस्मिन् वृद्धिर्वा आयो वा लाभो वा शुल्को वा उपदा वा दीयते पञ्चकः । सप्तकः[12] । शत्यः, शतिकः । साहस्रः ॥

[५१४] चतुर्थ्यर्थे उपसङ्ख्यानम् । (म. भा. २.३५१)

पञ्च अस्मै वृद्धिर्वा आयो वा लाभो वा [13]उपदा वा दीयते पञ्चको [14]देवदत्तः । सिद्धं त्वधिकरणत्वेन विवक्षितत्वात् । सममब्राह्मणे दानम् इति यथा ॥

## पूरणार्धाट् ठन् । (४८/१७१४)

पूरणवाचिनः [15]शब्दात् अर्धशब्दाच्च ठन् प्रत्ययो भवति 'तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते' (५.१.४७/१७१३) इत्येतस्मिन्न[16]र्थे । यथायथं ठक्टिठनोरपवादः । द्वितीयो [17]वृद्ध्यादिरस्मिन् दीयते [18]द्वितीयिकः । तृतीयिकः । पञ्चमिकः । [19]सप्तमिकः । अर्धिकः । अर्धशब्दो रूपकार्धस्य [20]रूढिः ॥

## भागाद्यच्च । (४९/१७१५)

भागशब्दाद् यत् प्रत्ययो भवति, चकारात् ठन् च, 'तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते' (५.१.४७/१७१३) इत्येतस्मिन्नर्थे[21] । ठञोऽपवादः । [22]भागो वृद्ध्यादिरस्मिन् दीयते भाग्यं, भागिकं शतम् । भाग्या, [23]भागिका विंशतिः । भागशब्दोऽपि रूपकार्धस्य वाचकः ॥

---

1. इत्यत्रार्थे क. ब. 2. इति इत्यधिकम् क. फ. ह. 3. अर्थे ह. फ. 4. क्षेत्रभूमिः क, नास्ति फ. 5. प्रथमा इत्यस्मिन्नर्थे फ. 6. प्रथमासमर्थम् नास्ति ब. क. 7. वृद्ध्यधिकम् ह. 8. मूलातिरिक्तं फ. 9. राजग्राह्यः फ. 10. वणिजां रक्षासुवेशः ह. 11. उपदा नास्ति फ. 12. नवकः इत्यधिकम् फ, अष्टकः इत्यधिकम् ह. 13. शुल्को वा इत्यधिकम् क. 14. ब्राह्मणः क. 15. प्रातिप्रदिकात् क. फ. ब. 16. विषये फ. 17. वृद्धादिभिः ह. 18. द्वितीयितः पञ्चयितः ह. 19. नास्ति ब. फ. 20. वाचकः ब. क. ङ. 21. विषये क. फ. 22. भागशब्दात् इत्यधिकम् क. 23. भागिका नास्ति क.